# पञ्चदशः पाठः
# पर्यावरणम्

मनुष्यो यत्र निवसति, यत् खादति, यद् वस्त्रं धारयति, यज्जलं पिबति यस्य पवनस्य सेवनं करोति, एतत्सर्वं पर्यावरणम् इति शब्देनाभिधीयते।

अधुना पर्यावरणस्य समस्या न केवलं स्वदेशस्य एव अपितु समस्तविश्वस्य समस्या वर्तते। यज्जलं यश्च वायुः अद्य उपलभ्यते, तत्सर्वं मलिनं दूषितं च दृश्यते। उद्योगशालानां मलिनं जलं नालिकानां माध्यमेन गंगासदृशीं पावनीनदीम् अपि मलिनायते। धूमनलिकाभ्यः निस्सरन् दूषितो धूमराशिः अद्य पवित्रमपि आकाशं दूषयति। समस्तं जलवायुमण्डलं पर्यावरणं विकृतं करोति।

आधुनिकाः वैज्ञानिकाः आणविकाः प्रयोगाः अपि पर्यावरणस्य प्रदूषकं संवर्धयन्ति। गतदिवसेषु ईराकअमेरिकादेशयोः भीषणे युद्धे प्रयुक्तैः आयुधैः समुद्रस्यापि जलं दूषितम्। तैलकूपेष्वपि अग्निः प्रज्वलिता। फलतः प्रत्येकः प्राणी शुद्धं प्राणवायुं प्राप्तुं न शक्नोति। दिवसे दिवसे च स्वास्थ्यं क्षीणं भवति।



अस्माकं पूर्वजाः पर्यावरणस्य शुद्धतायै उपवनानाम् उद्यानानां च आरोपणाय धार्मिकं विधानं यज्ञानाम् अनुष्ठानं च कुर्वन्ति स्म। साम्प्रतं वनानां छेदनेन वृक्षाणाम् अभावो भवति। तेषाम् अभावे अपेक्षिता वृष्टिः न भवति, येन अनावृष्टेः प्रकोपो वर्धते। अनावृष्टिः कृषिकार्यं बाधते। वृक्षाणाम् अभावे शुद्धो वायुरपि न लभ्यते। शुद्धं वायुं विना प्राणिनः अस्वस्थाः रुग्णाश्च जायन्ते।

इत्थं पर्यावरणस्य महत्वं सर्वविदितम् अस्ति। अस्य रक्षायै वयं सर्वथा सचेष्टाः भवेम।

## शब्दार्थाः

अपितु = बल्कि। धूमराशिः = धुएं का ढेर। आयुधैः = अस्त्रों–शस्त्रों से। आरोपणाय = लगाने के लिये। रुग्णाश्च = और रोगी (रुग्णाः+च)। अभिधीयते = बनाता है। लभ्यते = प्राप्त होता है। अधुना = इस समय। निवसति = रहता है। धारयति = धारण करता है।

## अभ्यासप्रश्नाः

**प्रश्न 1. निम्न प्रश्नों के उत्तर संस्कृत में दीजिए –**

(क) समस्तजलवायुमण्डलं पर्यावरणं किं करोति ?

(ख) दिवसे–दिवसे किं क्षीणं भवति ?

(ग) वृक्षाणाम् अभावे किं न लभ्यते ?

(घ) कस्य महत्वं सर्वविदितम् अस्ति ?

**प्रश्न 2. रिक्त स्थानों की पूर्ति कीजिए –**

(क) एतत् सर्वम् ........................ इति शब्देनाभिधीयते।

(ख) तेलकूपेष्वपि अग्निः ..........................................।

(ग) ......................... रक्षायै वयं सर्वथा सचेष्टाः भवेम।

**प्रश्न 3. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए –**

(क) पर्यावरण स्वच्छ होना चाहिए।

(ख) वृक्षों से लाभ होता है।

(ग) हमें वृक्षों की रक्षा करनी चाहिए।

(घ) गाँव का पर्यावरण अच्छा था।

**प्रश्न 4. (क) निम्नलिखित पदों का सन्धि–विच्छेद कीजिए –**

(i) पर्यावरणम् (ii) समुद्रस्यापि (iii) तेलकूपेष्वपि

**(ख) निम्नलिखित पदों की संधि कीजिए –**

(i) ईराक+अमेरिका (ii) च+आरोपणाय।

Q5PTDY